# प्रतिदर्श

# प्रश्न-पत्रम् -8

## स्वतः मूल्यांकन

समय : होरात्रयम् ] [ पूर्णाङ्का: 90

**निर्देशा:**

(i) प्रश्नपत्रे चत्वार: खण्डा: सन्ति।

| | | | |
|---|---|---|---|
| खण्ड: (क) | अपठित-अवबोधनम् | – | 10 अङ्का: |
| खण्ड: (ख) | रचनात्मकं कार्यम् | – | 15 अङ्का: |
| खण्ड: (ग) | अनुप्रयुक्त-व्याकरणम् | – | 30 अङ्का: |
| खण्ड: (घ) | पठित-अवबोधनम् | – | 35 अङ्का: |

(ii) सर्व प्रश्ना: अनिवार्या:।

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्न संख्या अवश्यं लेखनीया।

(v) उत्तराणि संस्कृतेन एव लेखनीयानि।

### खण्ड : 'क'

**अपठित-अवबोधनम्** **(10 अङ्का:)**

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत–**

महाकवि: कालिदास: न केवलं संस्कृतसाहित्यस्य अपितु विश्वसाहित्यस्य श्रेष्ठ: कवि: अस्ति। अतएव इंगलैण्डदेशवासिन: स्वकीयाभ्यां सर्वश्रेष्ठाभ्यां दान्ते–वर्जिलाभ्यां सह तस्य तुलनां कुर्वन्ति। जर्मनीदेशवासिन: तु तं 'शेक्सपीयर' इति कथयन्ति। एष: महान् कवि: नाटककार: चासीत्। कालिदासेन विरचिता: सप्त ग्रन्था: सन्ति। एतेषु रघुवंशम् कुमारसंभवम् इति द्वे महाकाव्ये, ऋतुसंहारं, मेघदूतम् नामके द्वे खण्डकाव्ये, अभिज्ञानशाकुन्तलम्, विक्रमोर्वशीयम् मालविकाग्निमित्रम् चेति त्रीणि नाटकानि सन्ति। सौन्दर्य-वर्णने काव्यप्रतिभायां च महाकवि: कालिदास: अद्यापि अप्रतिम: वर्तते। भारतीयमहाकविषु स: 'कविकुलगुरु' इति उपाधिना विभूषित:।

**प्रश्ना:**

**I. एकपदेन उत्तरत–** **1 + 1 = 2**

(i) कालिदास: कति नाटकानि अरचयत्?

(ii) क: कविकुलगुरु: कथ्यते?

**II. पूर्णवाक्येन उत्तरत–** **1 + 1 = 2**

(i) कस्मिन् विषये कालिदास: अद्यापि अप्रतिम:?

(ii) भारतीय महाकविषु क: कविकुलगुरु उपाधिना विभूषित:।

**III. निर्देशानुसारम् उत्तरत–** **1 + 1 + 1 + 1 = 4**

(i) कवि: इति पदस्य किं विशेषणपदम् अत्र प्रयुक्तम्?

(अ) श्रेष्ठ: (ब) एष: (स) महान् (द) कालिदास:

(ii) 'अद्वितीय:' इत्यर्थे गद्यांशे किं पदं प्रयुक्तम्?

(अ) नाटककार: (ब) प्रसिद्ध: (स) अप्रतिम: (द) काव्य प्रतिभा

LearnCBSE.in

(iii) जर्मनीदेशवासिनः तु 'तं' शेक्सपीयर इति कथयन्ति अत्र 'तं' इति पदं कस्मै प्रयुक्तम्?

(अ) शेक्सपीयर इति पदाय (ब) कालिदासाय

(स) भारतीयाय (द) मेघदूताय

(iv) 'कालिदासः अद्यापि अप्रतिमः वर्तते' अस्मिन् वाक्यांशे 'वर्तते' क्रियापदस्य कर्तृपदं किम्?

(अ) अद्यापि (ब) अप्रतिमः (स) कालिदासः (द) सः

**IV. अस्य गद्यांशस्य उचितं शीर्षकं लिखत।** **2**

## खण्डः (ख)

### रचनात्मकं कार्यम् (15 अङ्काः)

**2. भवान् ज्ञानेशः। चण्डीगढ़ नगरे एकस्मिन् छात्रावासे वसति। स्वाध्ययनाय पुस्तकानि क्रेतुं रुप्यकाणि प्रेषणार्थम् पितरं प्रति लिखितं अस्मिन् पत्रे रिक्त स्थानानि मञ्जूषायां प्रदत्तपदानां सहायतया पूरयित्वा उत्तरपुस्तिकायां लिखत—**

**½+½+½+½+½+½+½+½+½+½ = 5**

जुबिली छात्रावासः

चण्डीगढ़ नगरेतः

दिनांक ..........

पूज्ये पितृचरणे,

सादरं प्रणामाः।

अत्र (i)....... ।

तत्रापि सर्वे प्रसन्नाः स्वस्थाः च सन्ति, इति आशासे। मम अध्ययनं सुचारुरीत्या सम्पद्यते। निवेदनम् अस्ति यत् अहं रुप्यकाणां शतद्वयम् इच्छामि। त्वया प्रेषितानि मम सर्वाणि रुप्यकाणि (ii)....... जातानि। अहम् कानिचित् (iii)....... क्रेतम् इच्छामि। (iv)....... परीक्षोपयोगी कानिचित् पुस्तकानि दृष्टानि। कृपया शीघ्रमेव (v)....... प्रेषयित्वा अनुगृहणातु। गृहे माता स्वस्था भविष्यति। (vi)....... मम प्रणामः निवेदयतु (vii)....... अनुजाभ्याम् च (viii)....... आशीर्वादाः।

पत्रोत्तरस्य (ix)....... ।

भवतः। (x)....... ज्ञानेशः

**मञ्जूषा**

| |
|---|
| कुशलम्, समाप्तानि, तस्यै, प्रतीक्षायाम्, पुस्तकानि, मया, पुत्रः, रुप्याकाणि, सस्नेहम्, भवान् |

**3. मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतेन लिखत।** **2 + 2 + 2 + 2 + 2 = 10**



**मञ्जूषा**

| |
|---|
| मृगः, मयूरः, बानरौ, शशकः, वर्तका, कच्छपः, मत्स्याः, जले, धावति, खादति, तृणः, नृत्यति, वृक्षः, वर्षाकालस्य, शाखायाम्, तिष्ठतः |

**अथवा**

**मञ्जूषायां प्रदत्तशब्दानां सहायतया 'वृक्षारोपणम्' इति विषयम् अधिकृत्य पञ्चवाक्यानि संस्कृतेन लिखत।**

**2 + 2 + 2 + 2 + 2 = 10**

LearnCBSE.in

मञ्जूषा

| |
|---|
| हरितं वातावरणम्, शुद्धम्, महती आवश्यकता, वृक्षा:, जना:, सर्वत्र, कर्तव्यम्, वृक्षारोपण-दिवस:, कुर्वन्ति, वर्तते, अधिकाधिका:, पर्यावरणम् |

## खण्ड: (ग)

### अनुप्रयुक्त-व्याकरणम् (30 अङ्का:)

**4. (अ) अधोलिखितप्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत—** **1 + 1 = 2**

(i) 'घ' वर्णस्य किम् उच्चारणम् स्थानम् अस्ति ?

(ii) 'नास्ति' इति पदे कस्य वर्णस्य उच्चारणस्थानं 'नासिका' अस्ति ?

**(आ) रिक्तस्थानं पूरयत—** **1 + 1 = 2**

(iii) पवित्रम् = प् + अ + व् + इ + ....... + र् + अ + म्।

(iv) स् + ऊ + क् + ष् + म् + आ + त् = .......................

**5. प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा सन्धिं सन्धिच्छेदं वा कुरुत—** **1 + 1 + 1 + 1 + 1 = 5**

(i) अधुना अहं वाटिकां प्रति गमिष्यामि।

(अ) वाटिकाम् + प्रति (ब) वाटिकाम + प्रति

(स) वाटिका + प्रति (द) वाटिकां + प्रति

(ii) कवीश: अद्य विद्यालयं न गमिष्यति।

(अ) कवि + ईश: (ब) कवी + ईश:

(स) कवि + इश: (द) कवी + श:

(iii) सभायां जनैकता न दृश्यते।

(अ) जन + ऐकता (ब) जन + एक + ता

(स) जन + एकता (द) जनै + एकता

(iv) स: अध्ययने तल्लीन: अस्ति।

(अ) तल् + लीन: (ब) तल्ली + न:

(स) तल + ईन (द) तत् + लीन:

(v) यो मह्यं स्नेहं ददाति तस्मै ददामि + अहम्।

(अ) ददामि अहम् (ब) ददाम्यहम्

(स) ददा + हम् (द) ददामिहम्

**6. प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा रिक्तस्थानानि पूरयत—** **1 + 1 + 1 + 1 + 1 = 5**

(i) ............ तूष्णीं भूत्वा उपविश पठ च।

(अ) पुस्तकालय: (ब) पुस्तकालयम् (स) पुस्तकालये (द) पुस्तकालस्य

(ii) भारते .......... सम्मानं भवति।

(अ) कवीनाम् (ब) कविषु (स) कविभि: (द) हे कवे!

(iii) त्वं स्व ............. निपुणताया: प्रमाणं यच्छ।

(अ) मति: (ब) मते: (स) मतिम् (द) मत्याम्

(iv) एतत् .......... पुस्तकं मम नास्ति।

(अ) लघू (ब) लघु (स) लघुम् (द) लघु:

(v) ......... तत्र तिष्ठति, स: मम भ्राता अस्ति।

(अ) या (ब) यम् (स) य: (द) यस्य

**7. प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा रिक्तस्थानानि पूरयत—** **1 + 1 + 1 + 1 + 1 = 5**

(i) अहं श्व: कोलकातानगरं ..........।

(अ) गमिष्यसि (ब) गमिष्यति (स) गमिष्याव: (द) गमिष्यामि

(ii) ह्य: त्वं कुत्र......... ?

(अ) आसी: (ब) आसीत् (स) आस्ताम् (द) आसन्

LearnCBSE.in

(iii) सुधीराय सुन्दराणि वस्त्राणि..........।

(अ) रोचेते (ब) रोचसे (स) रोचन्ते (द) रोचते

(iv) ते पुस्तकालये पुस्तकानि..............।

(अ) पठति (ब) पठत: (स) पठन्ति (द) पठथ:

(v) वयं सदा गुरूणाम् आज्ञापालनं..........।

(अ) करोमि (ब) कुर्व: (स) करोति (द) कुर्म:

8. **कोष्ठके प्रदत्तानां शब्दानाम् उचितेन रूपेण वाक्यानि लिखत–** **1 + 1 + 1 + 1 + 1 = 5**

(i) मम ......... मार्गस्य समीपे अस्ति। (गृहं)

(ii) ......... बहि: एकं सुन्दरम् उद्यानम् अस्ति। (गृहे)

(iii) ......... परित: वृक्षा: सन्ति। (उद्यानम्)

(iv) मम सखाय: ......... कुशला: सन्ति। (कबड्डीक्रीडनम्)

(v) वयं तत्र सह 'कबड्डी' ......... । (क्रीडति)

9. **प्रदत्तविकल्पेभ्य: उचितानि उत्तराणि चित्वा लिखत–** **1 + 1 + 1 + 1 + 1 + 1 = 6**

(i) अहम् प्रधानमन्त्रिण: भाषणं श्रु+तुमुन् रक्तदुर्गं गच्छामि।

(अ) श्रोतुम् (ब) श्रुतुम् (स) श्रवितुम् (द) श्रवतुम्

(ii) मनीष: आलस्यं त्यज् + क्त्वा अध्ययनं करोति।

(अ) त्यजत्वा (ब) त्यजित्वा (स) त्यज्क्त्वा (द) त्यक्त्वा

(iii) मातापितरौ प्रणम्य पुत्र: विदेशं गच्छति।

(अ) प्र + णम् + ल्यप् (ब) प्रणम् + ल्यप् (स) प्र + नम् + ल्यप् (द) प्र + णम्य

(iv) छात्र: विद्यालयं गत्वा गुरुम् प्रणमति।

(अ) गम् + क्त्वा (ब) गम् + त्वा (स) गमि + क्त्वा (द) गन + त्वा

(v) त्वं गृहम् आ + गम् + ल्यप् पठसि।

(अ) आगमित्वा (ब) आगत्य (स) आगम्मय (द) आगत्वा

(vi) त्वं पत्रं लिख् + तुमुन् गच्छ।

(अ) लिखितुम् (ब) लिखतुम् (स) लेखितुम् (द) लिखितुम

## खण्ड: (घ)

### पठित-अवबोधनम् (35 अङ्का:)

10. **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** 5

एकदा असौ मुनि: क्वापि नगरे एकं ब्राह्मणगृहम् एत्य तद् गृहिणीं भिक्षामयाचत। सा पतिव्रता गृहिणी तमवदत्–"प्रतीक्षस्व क्षणं, यावद् भर्तु: परिचर्यां समापये" इति। एतत् श्रुत्वा मुनि: तां कोपदृष्ट्या दृष्टवान्। सा विहस्य अभाषत–''मुने! न अहं वलाकेति''। तत् आकर्ण्य विस्मित: मुनि ''एतत् कथमिव ज्ञातमनया'' इति चिन्तयन् तत्र उपाविशत्।

**प्रश्ना:**

**I. एकपदेन उत्तरत–** ½ + ½ = 1

(i) मुनि: कां भिक्षामयाचत?

(ii) गृहिणी कीदृशी आसीत्? **(मूल्यपरक: प्रश्न:)**

**II. पूर्णवाक्येन उत्तरत–** 2

गृहिणी मुनिं किमवदत्?

**III. निर्देशानुसारम् उत्तरत–** 1 + 1 = 2

(i) 'सा विहस्य अभाषत'–इत्यत्र कर्तृपदं किं प्रयुक्तम्?

(अ) सा (ब) विहस्य

(स) अभाषत (द) न कोऽपि

LearnCBSE.in

(ii) 'वलाकेति' इत्यत्र सन्धि विच्छेदमस्ति—

(अ) बालक + इति (ब) वलाका + इति (स) वलाके + ति (द) वला : केति।

11. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत। 5

**यदि सत्सङ्गतिरतो भविष्यसि भविष्यसि।**
**अथ दुर्जनसंसर्गे पतिष्यसि पतिष्यसि॥**

प्रश्ना:

I. एकपदेन उत्तरत। ½ + ½ = 1

(i) केन भविष्यसि ?

(ii) दुर्जन संसर्गे किं भविष्यसि ?

II. पूर्णवाक्येन उत्तरत। 2

सतां दुर्जनानां संगत्या किं भवति ?

III. निर्देशानुसारम् उत्तरत— 1 + 1 = 2

(i) 'दुर्जनसंसर्गे इत्यत्र का विभक्ति: प्रयुक्ता ?

(ii) 'पतिष्यसि' इत्यत्र क:लकार: प्रयुक्त: ?

12. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत— 5

सीता यत् आर्यपुत्र आज्ञापयति। (उत्थाय, परिक्रम्य, भरतम् अवलोक्य)
भरत: अये, इयम् अत्रभवती जनकराजपुत्री? आर्ये, अभिवादये, भरतोऽहमस्मि।
सीता (आत्मगतम्) नहि रूपमेव स्वरयोग: अपि स एव। (प्रकाशम्) वत्स! चिरञ्जीव।
भरत: अनुगृहीतोऽस्मि।
सीता एहि वत्स! भ्रातृमनोरथं पूरय।
राम: एहि एहि इक्ष्वाकुकुमार! स्वस्ति, आयुष्मान् भव।
भरत: अनुगृहीतोऽस्मि।

प्रश्ना:

I. एकपदेन उत्तरत— ½ + ½ = 1

(i) कस्य स्वरयोग: रामस्य स्वरयोग: इव?

(ii) राम: भरतं कथं सम्बोधयति?

II. पूर्णवाक्येन उत्तरत— 2

सीता भरतं किं कर्तुं कथयति?

III. निर्देशानुसारम् उत्तरत— 1 + 1 = 2

(i) अस्मिन् संवादे 'अभिवादये' इति क्रियापदस्य कर्ता क: अस्ति?

(अ) राम: (ब) सीता (स) भरत: (द) लक्ष्मण:

(ii) 'अये इयम् अत्रभवती' अत्र 'इयम्' इति सर्वनामपदं कस्यै प्रयुक्तम् अस्ति?

(अ) सीतायै (ब) रामाय (स) पुत्र्यै (द) भवत्यै

13. अधोलिखितपंक्त्यो: उचितं भावार्थं चित्वा उत्तरपुस्तिकायां लिखत। 1 + 1 + 1 + 1 = 4

**(i) य: सम्यगनुतिष्ठति।**

(1) य: नर: निर्देशानुसारम् स्वास्थ्यस्य नियमानां पालनं करोति।

(2) य: नियमानां पालनं न करोति।

(3) य: यथानिर्देशं तिष्ठति।

**(ii) अस्ति कश्चित् नीतिशास्त्रोपदेशेन पुनर्जन्म कारयितुं समर्थ:।**

(1) अत्र क: एवम्भूत: विद्वान् य: नीतिशिक्षया मूर्खान् पुत्रान् व्यवहारे निपुणान् कर्तुं शक्नोति?

(2) विष्णुशर्मा एव नीतिशास्त्रोपदेशेन पुनर्जन्म कारयति।

(3) कोऽपि मूर्खान् राजपुत्रान् नीतिशास्त्रस्य उपदेशेन व्यवहार-कुशलान् सभ्यान् च कर्तुं न शक्नोति।

**(iii) अनया कथया ज्ञायते यत्।**

(1) अर्धो घटो घोषमुपैति नूनम्।

LearnCBSE.in

(2) आत्म ज्ञानेन सर्वं विज्ञानं भवति।
(3) विद्यार्थी गुरुकुले पठित्वा ज्ञानवान् भवति।

**(iv) क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम्।**
(1) कालः कार्यस्य आनन्दं नाशयति।
(2) कार्यस्य आनन्दं स्वयम् एव नश्यति।
(3) कार्यस्य स्वादः न्यूनः भवति।

**14. अधोलिखितपद्यद्वयस्य अन्वययोः मञ्जूषायाः सहायतया रिक्तस्थानपूर्तिं कुरुत—** ½+½+½+½+½+½+½+½ = 4

**(I) स जातो येन जातेन याति वंशः समुन्नतिम्।**
**परिवर्तिनि संसारे मृतः को वा न जायते।।**

**अन्वयः**—सः जातः येन जातेन ____(i)____ समुन्नतिम् ____(ii)____ (अन्यथा) परिवर्तिनि ____(iii)____ मृतः को वा न ____(iv)____ ।

**(II) कीटोऽपि सुमनः सङ्गादारोहति सतां शिरः।**
**अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः।।**

**अन्वयः**—कीटः अपि सुमनः सङ्गात् ____(v)____ शिरः ____(vi)____ । महद्भिः सुप्रतिष्ठितः ____(vii)____ अपि ____(viii)____ याति।

**मञ्जूषा**

| संसारे, आरोहति, जायते, वंशः, याति, सतां, देवत्वम्, अश्मा। |
|---|

**15. अधोलिखितवाक्येषु रेखाङ्कितपदानां स्थाने उचितप्रश्नवाचकं पदं प्रयुज्य प्रश्ननिर्माणं कुरुत।** 1 + 1 + 1 + 1 = 4

(i) श्वेतकेतुः न्यग्रोधस्य फलम् आहरति।
(ii) पापम् न कुर्यात्।
(iii) भरतः रामम् अभिवादयितुम् इच्छति
(iv) आत्मनः ज्ञानेन सर्वं ज्ञातं भवति।

**16. घटनाक्रमानुसारम् अधोलिखितानि वाक्यानि क्रमेण पुनः लिखत—** ½+½+½+½+½+½+½+½ = 4

(i) रामः भरतम् उत्साहेन मिलति।
(ii) रामः चरणापदुके यच्छति।
(iii) भरतः रामाय अयोध्यां गन्तुं निवेदयति।
(iv) चरण पादुके भरतः इच्छति।
(v) भरतः समयतः राज्यं पालनाय कथयति।
(vi) आश्रमपदे भरतः गच्छति।
(vii) लक्ष्मणः भरतागमनं रामाय निवेदयति।
(viii) भरतस्य स्वागताय सीता गच्छति।

**17. (अ) अधोलिखितवाक्येषु रेखांकितपदानां कृते उचितम् अर्थं चित्वा लिखत—** 1 + 1 = 2

(i) पिपीलकः योजनानां शतान्यपि शनैः गच्छति।
(अ) गरुडः (ब) काकः (स) चिटिका (द) सर्पः

(ii) पयोदस्य स्थितिः उच्चैः भवति।
(अ) जलदस्य (ब) सागरस्य (स) गगनस्य (द) नीरस्य

**(आ) शब्दानाम् अर्थैः सह मेलनं कुरुत—** ½ + ½ + ½ + ½ = 2

| | |
|---|---|
| (i) भिन्धि | (अ) गन्धहीनाः |
| (ii) नरपतिः | (ब) आनय |
| (iii) निर्गन्धाः | (स) राजा |
| (iv) आहर | (द) भेदनं कुरु |

❑❑

LearnCBSE.in